खेदक्षराणि यथाविधि TantrRā. 20.15; **2 B** entire, full, complete, whole बाणच्छिदस्ते विशिखाः स्मरारेः···। अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः Kirātā. 17.30; कथं सुखम्···अखण्डितं तत्···श्रोतुं मनो मां त्वरयत्यतीव VarāṅgaC. 21.27; आदित्यः। ···अदितेरखण्डिताया मह्या अयं पतिरिति वा ViṣṇuSaBh. 46.5 (*on* 18); कपिलानां शतं दत्त्वा ···। तेन यत्फलमाप्नोति तद्द्वादश्यामखण्डितम् VarāP. 174.62; शृणु राजन्प्रवक्ष्यामि रामायणमखण्डितम् YogVā. i. 1.52; ii. 2.27; iii. 1.34; iii. 60.8; iv. 42.22; स्वप्ने पश्यत्यसौ देवीं विष्णुमायामखण्डिताम् DevīBhāP. iii. 18.14; उद्यमिताभ्यां स्वं वपुः कर्तुमखण्डितम्। श्रीजोनराजविबुधश्रीवराभ्याम् ···। कृतं द्वापष्टिवर्षान्तं ग्रन्थं राजावलिद्वयम् RājTa.(Prā.) 5; यत्पञ्चमं तत्परिशेषखण्डमखण्डितो यत्र विभाति धर्मः CaturCin. ii(1). 4.2; रसा भोज्ये गुणा राज्ये तर्का वादविदां वरे। षडेव यत्र (= भारतवर्षे) खण्डानि तथा रेजुरखण्डिते S'āliC. 2.8; सर्वतन्त्राधिकारेण राजतन्त्रमखण्डितम्। ताजिभट्टाय मल्लेको मुष्टिबन्धमिवाकरोत् RājTa.(S'ri.) 3.163; कैरवैर्हवनात्···पुष्पैरप्यरुणैः शुभैः। अखण्डितैरब्दमात्रं नरो नृपतिसंनिभः TantrRā. 32.5; **3** unclipped, unshaven शरीरैकदेशानां च लोमनखादीनां नित्यत्वेन अभिप्रेतानामखण्डितानां छायाकरत्वं पूर्वमासीत् ChāndoUBh. 514.8 (*on* viii. 8.2); **4** undisciplined न ह्यखण्डितः पण्डितो भवति PramāVāBh. 34.14; **5** unviolated (vow, conduct, order etc.) अविप्लुतं अखण्डितं ब्रह्मचर्यं स्त्रीसंप्रयोगनिवृत्तिर्यस्य सः (अविप्लुतब्रह्मचर्यः) ManuBh. i. 204.4 (*on* 3.2); चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् BhāgP. i. 3.6; वर्णानामाश्रमाणाञ्च तदा धर्मो ह्यखण्डितः BṛDharmaP. ii. 12.6; लोभोऽभिमाने न धने तृष्णा यशसि नायुषि। एतावदेव महतां वीरव्रतमखण्डितम् RāmāMañ. 413.16; सर्वत्र विक्रमादित्यदेवस्याज्ञा ह्यखण्डिता KathāSaSāg. xviii. 5.79; निशानां च दिनानां च यथा ज्योतिर्विभूषणम्। सतीनां च यतीनां च तथा शीलमखण्डितम् VairāS'.(Pa.) 68; दानेन तेन ते। अखण्डितानामाज्ञानां शतमासीन्त्रिविष्टपे RājTa.(Ka.) 4.232; सतां शीलमखण्डितम् PārśvC. 2.757; सामाचारी गणेऽस्मिंस्तु शुद्धा सैवास्त्यखण्डिता Gurvā. 468; यदि मम अखण्डितं शीलं ततः कुण्डबाह्ये वर्षतु मेघः KathāK. 153.17; **6** unlimited, infinite, perfect, impartite, all-pervading, indivisible परमात्मा त्वखण्डितः AjaḍaPraSi. 1.16; 'महस्' सर्वतोऽखण्डितपरिपूर्णनिरर्गलनिरपेक्षस्वातन्त्र्यजगदानन्दमयस्य ParāTri. 68.7; 135.17; तदा पुरुष आत्मानम्···अणिमानमखण्डितम्।··· परिपश्यति BhāgP. iii. 25.17; निरवयवस्याखण्डितस्य ब्रह्मण एवोपाधिसंबन्धात् BrahmSūBh(Rā.) 445.1 (*on* ii. 1.15); बहिरन्तःपदार्थे हि चित्स्वरूपमखण्डितम् LakṣmīT. 3.30; यदवबुद्धमखण्डितमुत्तमं तदवबोधवशान्न जहाति हि (मनः) YogVā. ii. 20.15; iii. 13.53; iii. 67.33; iii. 84.26; अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम् HaṭPra. 4.78; अन्तर्बहिः स्वयमखण्डितमेकरूपम्···ब्रह्म SarvaVeSāSaṁ. 779; 896; (अखण्डितस्वभावः) अखण्डितः···परमार्थतः खण्डनारहितः स्वभावः···यस्य तादृशः Bhāsk. ii. 243.12 (*on* iii. 2.1); **7** unbitten तार्क्ष्यवपुरिवाखण्डितं सर्पदशनैर्वसुन्धराया मधुरिपोश्च वास इति विश्रुतमुद्वहन्तं वारि भगवन्तमम्भोनिधिमपश्यम् TilaMañ. 122.21; **8** undefiled, unpolluted, TilaMañ. 122.21; **9** unimpaired, undamaged त्रिदशाः···नवान्यङ्गानि लेभिरे।···भगो नेत्रं त्वखण्डितम् SkandP. i. (3.1) 6.50; तावदशेषविचारसमर्थस्तावदखण्डितमूर्च्छति(? मृच्छति) मानम्।···यावदनङ्गवशी न मनुष्यः SubhāRaSaṁ. 579; **10** unrefuted, irrefutable संशयादयश्च भिन्ना नीलादिवैचित्र्यं च इति सर्वमखण्डितम् PratyabhiVi. i. 283.3 (*on* i. 5.18); वाक्यार्थस्य सखण्डत्वं भावेन यदि जायते। अभावेनापि जायेत सखण्डत्वमखण्डितम् S'atDū. 161.2; चित्रैः पदैश्च गंभीरैर्वाक्यैर्मानैरखण्डितैः। गुरुभावं व्यञ्जयन्ती भाति श्रीजयतीर्थवाक् Nyāyāmṛ 3B.5; **11** unhurt अखण्डितान्पाण्डुसुतान्विज्ञाय कुरुभूपतिः। अलङ्घ्यशासनं दैवं मेने दलितपौरुषम् DaśāvaC. 8.584; अखण्डितस्त्वं मकराकरादपि प्रभूतमाकृष्य जलं यदागतः VikraDeC. 13.61; **12** undisturbed कुण्डलादिषु भावेषु सर्वेष्वेव सुवर्णता। व्याप्तिरखण्डितैवास्ते शिवता सर्वगामिनी S'ivDṛ. 6.92; सुतस्तस्य···। विधुरे राज्ञि निर्यातः शौर्योद्रेकादखण्डितः RājTa(Ka.) 7.264; **13** unblemished, perfect गणितं गुणिना तेन मणींस्तृणमिवोज्झता। खण्डेन्दुमण्डनार्चायां मण्डनत्वमखण्डितम् RājTa.(Ka.) 1.280; पुंसामेकमखण्डितं पुनरिदं मन्यामहे मण्डनं यत्···सूक्तयः SūktiMu. 3.7; **14** eternal विचक्षणः।···पश्यते तत्र चिच्छक्तिं त्रुटिमात्रामखण्डिताम् MālinīT. 18.37; **15** unseparated चन्द्रादिषु प्रसृतः किमात्मैकदेश उत कृत्स्नात्मा।··· यद्येकदेशः प्रसृतः स चेदखण्डितः प्रसृतो न पुनरेति आत्मापि शरीराद्बहिराकृष्टः स्यादिति शरीरं निरात्मकं स्यात् S'rutaPra. ii. 367.11 (*on* ii. 3.32); **16** not blown into a blossom, (जातिप्रसूनकैश्चित्रैः सिताम्भोजैरखण्डितैः) अखण्डितैः संवृतैः CaturCin ii(1). 466.8; **17** undiminished राजा···प्रायादेवाखण्डितोद्दामधैर्यः KathāSaSāg. xii. 17.69.

**अखण्डित** (a-khaṇḍita) *n.* the indivisible (Brahman) त्वं महाधिया। जानासि सर्वमेवेदं यथास्थितमखण्डितम् YogVā. v. 63.6; *m.* **1** name of the deity protecting the treasure न्यसेन्निधिनाथेश्वरान् क्रमात्। शङ्खपद्मौ···। अखण्डितः संततश्चानन्तधार इति श्रुतः PāraS. 11.267. **ii** name of the moon रात्रिनाथो ध्वान्तहर्ता ··· तारापतिरखण्डितः। ··· नाम्नामष्टोत्तरशतं चन्द्रस्य पापनाशनम् BṛDharmaP. ii. 11.23.



**अखण्डितख्यातिमद** (akhaṇḍita-khyātimada) *adj.* whose pride due to fame has not been damaged केन खानितमिदं मानसेनाप्यखण्डितख्यातिमदम्···अच्छस्वादुविपुलोदकं पद्मसरः TilaMañ. 224.8.

**अखण्डितगण्डोपल** (akhaṇḍita-gaṇḍopala) *adj.* with boulders not removed (देवासुराः) अखण्डितगण्डोपलम्···अवहन्त मन्दरम् NīlaVi. 74.12.

**अखण्डितगुणश्लाघिन्** (akhaṇḍitaguṇa-ślāghin) *adj.* praiseworthy due to all virtues यावच्चन्द्रार्कमण्डले। अखण्डितगुणश्लाघी तावद्राजा भवानघ YogVā. v. 41.31.

**अखण्डितचण्डभानु** (akhaṇḍita-caṇḍabhānu) *m.* the entire sun तुरगरथप्रदानम्···यः करोति···सः।···आक्रम्य मण्डलमखण्डितचण्डभानोः।···अम्बुजभवेन चिरं सहास्ते MatsyP. 281.15.

**अखण्डितचरित्र** (akhaṇḍita-caritra) *adj.* [*f.* -ā] possessed of unviolated or undamaged character or conduct प्रकटाङ्गनोपभोगाप्यखण्डितचरित्रा···उज्जयिनी नाम नगरी Kād. 52.8.

**अखण्डितचारित्र** (akhaṇḍita-cāritra) *adj.* [*f.* -ā] whose conduct or character is not violated or defamed सैषा भवद्भुजच्छायामखण्डितचारित्रा तावदध्यास्तां यावदस्याः पाणिग्राहकमानयेयमिति DaśKuC. 99.12; देशेऽत्रैव पुरा भिल्लैः श्रीस्थलग्रामतो हृतः। जनोऽखण्डितचारित्रो मुक्तश्चार्थेन भूयसा SamarāSaṁ. 2.244; देवी···। अस्त्यखण्डितचारित्रा सहकारलतागृहे SamarāSaṁ. 5.417.

**अखण्डिततण्डुल** (akhaṇḍita-taṇḍula) *m.* unbroken (grain of) rice प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलैः NaiṣaC. 19.14 = Subhāṣi. 2199; मुक्तावली पुनरखण्डिततण्डुलाली।···सपर्यापूजनाय···कृशाङ्गि RomāS'. 85.

**अखण्डिततनु** (akhaṇḍita-tanu) *adj.* whose form (i. e. movement) is unobstructed यदा वाह्यो वायुर्वहति गगनेऽखण्डिततनुः BṛSaṁ. 27.2 (v. l.) (comm. अखण्डिततनुः = अविहतगतिः)

**अखण्डितता** (akhaṇḍita-tā) *f.* **1** uninterruptedness, continuity हृदगिरितरुप्रभृत्युपाधिसंकोचेन रहिते तद्वत्यपि वा अरण्यानीप्रदेशे दूरादखण्डिता दृष्टिरेवमेवाखण्डिततामुपाश्नुवाना भैरवबोधानुप्रवेशं प्रति संप्रदायतामासादयेत ParāTri. 136.9; **2** the state of being unchecked (i. e. unopposed), unfailing nature सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः। तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमखण्डितता विधेः S'atTrayī. 342.

**अखण्डिततादूप्य** (akhaṇḍita-tādrūpya) *adj.* whose original nature is unobscured or unshrouded इतश्च किमतिदुष्करं भविष्यति यत्प्रकाशात्मनि अखण्डिततादूप्ये एव प्रकाशमाने प्रकाशननिषेधावभासः प्रकाशमानः PratyabhiVi. ii. 141.5 (ii. 3.17)

**अखण्डिततेजस्** (akhaṇḍita-tejas) *adj.* **1** whose valour or prowess is unchecked रविरिवोन्मुखपद्माकरगृहीतपादपल्लवः सुखेनाखण्डिततेजा दिवसान्नयति शूरः HarṣaC. 260.11; **2** (the sun) whose brilliance is unimpaired, HarṣaC. 260.11; **3** whose splendour is undiminished तत्र चन्द्रावलोकस्तं वीक्ष्याखण्डिततेजसम्।··· बालं राजा ननन्द सः KathāSaSāg. xii. 27.112.

**अखण्डितत्व** (akhaṇḍita-tva) *n.* **1** the nature of being indivisible, oneness श्रीसोमानन्दपादैस्तु शुक्लुवसंस्कारादि सर्वं सहत्वप्रतिपादनेनाप्यखण्डितत्वाभिप्रायेण निरूपितम् ParāTri. 268.9; **2** the nature of not being disturbed न च कश्चिद्दोषः। प्रकृतरसपरिपोषस्याखण्डितत्वात् AlaṅkāRa. 19.(16); **3** the nature of not being split तस्मात् इति चेदित्यन्तस्य पूर्वपक्षविषयत्वं तत एवाखण्डितत्वं च युक्तम् S'rutaPra. ii. 507.10 (*on* iii. 3.37); **4** the nature of being unrefuted तत्राखण्डितत्वे तदेव विश्वस्यापि सत्त्वमिति पश्य S'atDū. 97.13.

**अखण्डितदण्ड** (akhaṇḍita-daṇḍa) *m.* the unbroken staff (i. e. the unviolated or unchallenged command or law) अखण्डितदण्डचण्डहस्तः पुरोऽस्य रभसादुपयाति मृत्युः HarVi. 39.21.

**अखण्डितधी** (akhaṇḍita-dhī) *adj.* whose mind is not distracted or bewitched प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः···। तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान्। ऋषिं नारायणमृते योषिन्मय्येह मायया BhāgP. iii. 31.37.

**अखण्डितपद** (akhaṇḍita-pada) *adj.* having an undisputed state तेनास्य स्वगुणैरखण्डितपदं सार्वज्ञ्यमुद्योतते NyāyMāVi. 3.5 (*on* i. 1.1)

**अखण्डितपराक्रम** (akhaṇḍita-parākrama) *adj.* whose valour is not checked, of unopposed valour गुहां खण्डप्रपाताख्यामखण्डितपराक्रमः। ··· नृपः प्राप TriṣaS'aPuC. i. 4.549; तं राजराजनृपतिः···पश्यन्नखण्डितपराक्रममभ्यषिञ्चत्···यौवराज्ये S'ivLī. 18.81.

**अखण्डितपौरुष** (akhaṇḍita-pauruṣa) *adj.* of unopposed or unimpeded valour चरणयोः···अस्पृशन्। नृपतयः शतशः···तमखण्डितपौरुषम् RaghuVa. 9.13.